International Journal of Sanskrit Research 2018; 4(5): 01-02

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(5): 01-02
© 2018 IJSR
www.anantaajournal.com
Received: 01-07-2018
Accepted: 02-08-2018

**डॉ० शिवकुमार मिश्र**
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा, बिहार,
भारत

**Correspondence**
**डॉ० शिवकुमार मिश्र**
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा, बिहार,
भारत

# महाकविमाघस्य पदान्वर्थीकरणवैशिष्ट्यम्

**डॉ० शिवकुमार मिश्र**

**प्रस्तावना**

पण्डितः सर्वशास्त्राणां माघो नाम महाकविः।
सर्वशास्त्रीय–पाण्डित्य महाकाव्ये प्रकाशयत्।।1।।
शिशुपालवधे स्वच्छे दर्पणे प्रतिबिम्बितम्।
व्याकरणात्मकं ज्ञानं सर्वथा प्रकटीकृतम्।।2।।
तेषु वशिष्ट्य–पुंजेषु शैली समवलोक्यताम्।
वैयाकरणमाघस्य अन्वर्थीकरणात्मिका।।3।।
पुरतो नारदस्यर्षेः सूर्यसदृशवेजसः।
विकसल्लोचनः कृष्ण पुण्डरीकाक्ष एव सः।।4।।0 [1]
परमैश्वर्यरूपस्येन्द्रार्थस्य च विनाशकः।
कविना वर्णितः सम्यक् हिरण्यकशिपुः किल।।5।। [2]
असुक्षेपण इत्यस्मात् निष्पन्नस्यासुरस्य वै।
क्षेपकार्थकता नूनं साधिता तेन रक्षसा।।6।। [3]
तस्माद्भीता सती हित्वा दिगीशानसुरंच तम्।
लक्ष्मीः वृतवती यस्मात्तस्मात्साभिहिता चला।।7।। [4]
देवानां रावकत्वेन रावणो नाम राक्षसः।
कृतवान् स्वाभिवानस्य सार्थकत्वं न संशयः।। 8।। [5]
शत्रूणां भीषणकत्वेन–आत्मीयत्वेन वै तथा।
कृष्णाय नन्दको नाम कृतवान् सार्थकं निजम्।।9।। [6]
रत्नानां द्वारकापुर्याः चौर्येण सरितां पतिः।
रत्नाकरो जनैरुक्तः रत्नानामाकरो भवन्।।10।। [7]
क्षेपकोथाऽसनो नाम पुष्पं मानवती स्त्रियाम्।
रुषां निरसनः स्वीयम् अर्थमभिदधाति वै।।11। [8]
कृष्णपत्नीकराब्जस्य संसर्गात्मकया श्रिया।
सुमनो नामकं पुष्पं सर्वथान्वर्थतां गतम्।।12।। [9]
पुष्पाणां मधुनः पानात् विरक्तो मधुपः खलु।
स्त्रियोऽधरामृतं पीत्वाऽमृतपो वै बुभूषति।।13।। [10]
सपत्नीसंज्ञया हूता पत्नी प्रोक्तवती पतिम्।
यद्भवान् वर्त्तते इन्द्रः गीत्रभित्वेन सर्वथा।।14।। [11]
प्रदत्तं मुखमद्यं यत् कामासक्तप्रियेण हि।
अरोचत यतः स्त्रिभ्यः प्रमदा यौगिकी ततः।।15।। [12]
ईक्षमाणो निजोरु वै प्रियया ताडितः प्रियः।
यतोऽस्ति कणपुष्पेण कामः पुष्पशरस्ततः।।16।। [13]
शब्दायमान उष्ट्रो वै भारं सोढुमशक्नुवन्।
स्वीयां रवण इत्याख्यां कुरूते स्माथ सार्थकम्।।17।। [14]
त्रिभिर्मार्गैहि गच्छन्ती भूनदी पर्वतात्मकैः।
गत्र्यं सर्वथा वाच्या निस्सन्देहं त्रिमार्गगा।।18।। [15]
हविषा मन्त्रपूतेन भक्ष्यमाणेन वह्निा।
शरीरं पावितं साकं हविर्भुगिति संज्ञया।।19।। [16]

ईदृशानां पदानां वै अन्वर्थीकरणं किल।
शैल्या महाकवेनूनं स्मर्त्तव्यमतिशायकाम्।।20।।
शिवकुमारमिश्रेण विवेचितं यथामति।
वैशिष्ट्यं हि माघस्य अन्यवर्धीकरणात्मकम्।।21।।

**सन्दर्भ ग्रन्थ सूची**


1. शिशुपालवधे–1.24।
2. तत्रैव–1.42।
3. तत्रैव–1.43।
4. तत्रैव–1.44।
5. तत्रैव–4.48।
6. तत्रैव–3.18।
7. तत्रैव–3.38।
8. तत्रैव–6.47।
9. तत्रैव–7.28।
10. तत्रैव–7.42।
11. तत्रैव–8.80।
12. तत्रैव–10.23।
13. तत्रैव–10.68।
14. तत्रैव–12.8।
15. तत्रैव–12.23।
16. तत्रैव–14.36।